दिनाङ्क :- 14.10.2025

प्रात: - 06:55

## राष्ट्रपति मंगोलिया - भारत

मंगोलिया-देशस्य राष्ट्रपतिः खुरेलसुख-उखना-वर्यः अद्य प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना सह वार्तां करिष्यति, उभयपक्षौ द्विपक्षीयसम्बन्धानां समीक्षां च करिष्यतः । वार्तायाः अनन्तरं अनेकेषु ज्ञापनपत्रेषु हस्ताक्षरं भविष्यति इति अपेक्षा अस्ति । अद्य सायंकाले राष्ट्रपतिभवने मंगोलियादेशस्य राष्ट्रपतिः, राष्ट्रपतिपदासीनया द्रौपदी मुर्मू वर्यया सह मिलिष्यति। राष्ट्रपति मुर्मू आगन्तुकस्य गणमान्यस्य सम्मानार्थं भोजस्य आयोजनं करिष्यति। इयं राष्ट्रपतिरूपेण खुरेलसुखस्य भारतस्य प्रथमा यात्रा वर्तते ।

## मेडागास्कर राष्ट्रपति पलायनम्

मेडागास्करस्य राष्ट्रपतिः एण्ड्री राजोएलिना, देशे वर्धमान-अशान्तेः, सैन्यपलायनस्य च मध्ये देशात् पलायितः अस्ति । अनेन वैश्विक जेन-जेड् वंशश्रेणिक- अशान्तेः तरङ्गस्य मध्यं युवानां नेतृत्वे विरोध-आन्दोलनेन पतितः एषः द्वितीयः सर्वकारः भवति । विपक्षनेता सिटेनी राण्ड्रियाना-सोलोनियैको इत्यनेन उक्तं यत् राष्ट्रपतिः राजोएलिना रविवासरे तदा प्रस्थितः यदा, परिवर्तनस्य आग्रहं कुर्वन्तः सेना-एककाः आन्दोलनकारिभिः सह सम्मिलिताः अभवन् । राष्ट्रपतेः वर्तमानस्थानं अज्ञातम् अस्ति । राष्ट्रियसम्बोधने राजोएलिना अवदत् यत् सः स्वजीवनस्य रक्षणार्थं सुरक्षितस्थानं गतः परन्तु स्वस्य स्थलं न प्रकाशितवान् । फ्रांसदेशस्य राष्ट्रपतिः इमैनुएल मैक्रोन् मेडागास्करदेशे संवैधानिकव्यवस्थायाः संरक्षणस्य आह्वानं कृतवान् यतः राजोएलिना फ्रांसदेशस्य सैन्यविमानेन गतः स्यात् इति समाचाराः प्राप्ताः।

## ट्रम्प शांति समझौता

अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः, तस्य मिस्रदेशस्य तुर्किये-देशस्य च समकक्षाः अथ कतार-देशस्य नेता च विंशति क्षेत्रीयवैश्विकनेतृणां उपस्थितौ मिस्रदेशस्य शर्म-एल-शेख-नगरे गाजा-मध्ये वर्षद्वयस्य युद्धस्य समाप्तिम् उद्दिश्य ऐतिहासिकघोषणायां हस्ताक्षरं कृतवन्तः । गतरात्रौ शर्म-एल-शेख-शान्ति-शिखरसम्मेलने एतत् हस्ताक्षरं जातम् । शिखरसम्मेलने वदन् राष्ट्रपतिः ट्रम्पः अवदत् यत् एषः विश्वस्य कृते मध्यपूर्वस्य च कृते अत्युत्तमः स्मरणीयः दिवसः अस्ति । सः प्रादेशिकनेतृभ्यः तेषां समर्थनार्थं धन्यवादं दत्तवान् ।

**ट्रम्प - मोदी - मित्र**

अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः इजिप्ट्-देशे शर्म-एल-शेख-शिखरसम्मेलने स्वस्य भाषणस्य समये, भारतस्य प्रशंसाम् अकरोत्, अथ प्रधानमन्त्रिणं नरेन्द्रमोदिनम् "अत्युत्तम सुहृद्" इत्यपि उक्तवान् । डोनाल्ड ट्रम्पः उक्तवान् यत्, भारतम् एकः महान् देशः, यस्य एकः अतीव उत्तमः सुहृत् - प्रधानमन्त्री नरेन्द्र मोदी शीर्षस्थाने कार्यं कुर्वन् अस्ति । राष्ट्रपतिः ट्रम्पः पाकिस्तान-भारतयोः सम्बन्धेषु आशावादं प्रकटितवान् ।

**दिल्ली - वनम् घोषितः**

दिल्लीसर्वकारेण दक्षिण-रिड्ज्-क्षेत्रस्य प्रायः एकचत्वारिंशत् वर्ग-किलोमीटर्-मितः प्रदेशः आरक्षितं वनम् इति घोषितः ।

दिल्ली मुख्यमन्त्री रेखागुप्ता उक्तवती यत् राष्ट्रराजधान्याः प्रदूषणात् रक्षणाय, स्थायिरूपेण पर्यावरणस्य सुदृढीकरणाय च एषः निर्णयः कृतः। सा अवदत्, एतादृशेषु वनक्षेत्रेषु मुक्तभूमौ सर्वकारः देशीयवृक्षान् रोपयिष्यति, येन मृत्तिकायाः उर्वरता वर्धते, पर्यावरणं च अधिकं सुदृढं भविष्यति । मुख्यमन्त्री अवदत्, दिल्लीं प्रदूषणमुक्तं, हरितं, पर्यावरणसन्तुलिताम् आधुनिक-राजधानीं च कर्तुं सर्वकारस्य प्राथमिकता अस्ति।

**महिला क्रिकेट विश्वकप**

अन्ताराष्ट्रिय-महिला-एकदिवसीय-क्रिकेटविश्व-चषक-स्पर्धायाम्,दक्षिणाफ्रिकादेशः गतरात्रौ विशाखापत्तनम-नगरे बाङ्गलादेशस्य विरुद्धं रोमाञ्चकारीं स्तोभकत्रय- विजयं प्राप्तवान् । प्रथमं तावत् बाङ्गलादेशः स्वस्य पञ्चाशत् क्षेपचक्रेषु षट्-स्तोभकहानौ, द्वात्रिंशदुत्तर-द्विशतं धावनांकान् समार्जयत् ।तस्य उत्तरे दक्षिण-आफ्रिकादेशेन केवलं त्रिषु कन्दुकेषु अवशिष्टेषु सप्त-स्तोभकहानौ लक्ष्यप्राप्तिः कृता ।अनेन दक्षिण-आफ्रिकादलं तृतीयस्थानं प्राप्नोति। बाङ्गलादेशः च षष्ठस्थाने वर्तते ।